प्रवेलः, पुं, (प्र+वेल्+अच्।) पीतमुद्गः। इति हेमचन्द्रः। ४। २३८॥

प्रवेशः, पुं, (प्र+विश्+“हलश्च।।” ३। ३। १२१। इति भावे घञ्।) अन्तर्विगाहनम्। इति हेमचन्द्रः। ६। १०६॥ (यथा, कामन्दकीये नीतिसारे। ७। ३९।
“निर्गमे च प्रवेशे च राजमार्गं समन्ततः।
प्रोत्सारितजनं गच्छेत् सम्यगाविष्कृतोन्नतिः॥”)

प्रवेशनं, क्ली, (प्रविश्यतेऽनेनेति। प्र+विश्+करणे ल्युट्।) सिंहद्वारम्। इति हेमचन्द्रः। ४। ५९॥ (प्र+विश्+भावे ल्युट्।) प्रवेशः। यथा हरिवंशे। १७४। ११२।
“तव योगप्रभावेन शक्यं तत्र प्रवेशनम्।
किं मे बहुविलापेन श्रूयतां सखि। कारणम्॥”

प्रवेष्टः, पुं, (प्रवेष्टते इति। वेष्ट् वेष्टने+अच्।) बाहुः। इत्यमरः। २। ६। ८०॥ बाहुनीचभागः। इति शब्दचन्द्रिका॥ हस्तिदन्तमांसम् इति शारावली। ३०॥ गजपृष्ठतल्पनम्। इति त्रिकाण्डशेषः॥

प्रव्यक्तं, त्रि, प्रव्यज्यते स्मेति। प्र+वि+अन्ज्+क्तः।) स्फुटम्। इत्यमरः। ३। १। ८१॥ (यथा सुश्रुते निदानस्थाने द्वितीयाध्याये।
“जातिष्वेतानि रूपाणि प्रव्यक्ततराणि भवन्ति”)

प्रव्रजजितः, पु, (प्र+व्रज्+क्तः।) बुद्धभिक्षुशिष्यः। तत्पर्य्यायः। चेलुकः २ श्रामणेरः ३ महापाशकः ४ गोमी ५ इति त्रिकाण्डशेषः॥ त्रि, प्रव्रज्याश्रमविशिष्टः॥ (यथा पराशरसंहितायाम्। ४। २६।
नष्टे मृते प्रव्रजिते क्लीवे च पतिते पतौ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते॥”
प्र+व्रज्+भावे क्तः। क्ली सन्न्यासः। यथा, महाभारते। ५। १७६। ५।
“अलं प्रव्रजितेनेह भद्रे! शृणु हितं वचः।
इतो गच्छस्व भद्रन्ते पितुरेव निवेशनम्॥”)

प्रव्रजिता, स्त्री, (प्रव्रजितस्य लिङ्गमिव जटादिकमस्त्यस्या इति। अर्च्। टाप्।) मांसी। मुण्डीरी। (प्रव्रजित+टाप्। तापसी। इति मेदिनी। ते, २१०॥

प्रव्रज्या, स्त्री, (प्र+व्रज+“व्रजयजोर्भावे क्यप्।” ३।३।९८। इति भावे क्यप्प्रत्ययः।) सन्न्यासः॥ (यथा, महाभारते। ३। १७७। ७।
“बाणवेगं हि कस्तस्य शक्तः सोढुं महात्मनः।
प्रव्रज्यायां हि मे हेतुः स एव पुरुषर्षभः॥”
यथा च कुमारे। ६। ६।
“मुक्तायज्ञोपवीतानि बिभ्रतो हैमवल्कलाः।
रत्नाक्षसूत्राः प्रव्रज्यां कल्पवृक्षा इवाश्रिताः॥”
“अत्र चतुर्थाश्रमवाचिना प्रव्रज्याशब्देन वानप्रस्थाश्रमो लक्ष्यते ‘अद्भुः परिग्रहव्रीडां प्राजापत्यास्तपस्विनः’ इति सपत्नीकत्वाभिधानात् ‘सुतविन्यस्तपत्नीकः तया वानुगतोऽपि सन्, इति वानप्रस्थस्योभयथा स्मरणात्॥” इति मल्लिनाथः॥ वृथाप्रव्रज्याश्रितानां निन्दनीयत्वमुक्तम्। यथा, मनौ। ५। ८९।
“वृथासङ्करजातानां प्रव्रज्यासु च तिष्ठताम्।
आत्मनस्त्यागिनाञ्चैव निवर्त्ततोदकक्रिया॥”
क्ली, प्रव्रजनम्। यथा, महाभारते। ४। १७। ११।
“कोऽहि राज्यं परित्यज्य सर्व्वस्वं चात्मनासह।
प्रव्रज्यायैव दीव्येत विना दुर्य्यूतदेविनम्॥”)

प्रव्रज्यावसितः पुं, (प्रव्रज्याया अवसितो विच्युतः सन्न्यासभ्रष्टः। यथा,—
“तवाहमित्युपगतः प्रव्रज्यावसितः कृतः॥”
इति दायभागवचनव्याख्यायां क्रमसंग्रहः॥ (यथा, कात्यायनवचनम्।
“प्रव्रज्यावसिता यत्र त्रयो वर्णा द्विजोत्तमाः।
निर्व्वासं कारयेद्विप्रं दासत्वं क्षत्त्रवैश्ययोः॥”)

प्रशंसा, स्त्री, (प्र+शन्स+भावे अः। स्त्रियां टाप्।) प्रशंसनम्। तत्पर्य्यायः। वर्णना २ ईड़ा ३ स्तवः ४ स्तोत्रम् ५ स्तुतिः ६ नुतिः ७ श्लाघा ८ अर्थवादः ९। इति हेमचन्द्रः। २। १८४॥ (यथा, मनुः। १०। १२७।
धर्म्मेप्सवस्तु धर्म्मज्ञाः सतां वृत्तिमनुष्ठिताः।
मन्त्रवर्ज्जं न दुष्यन्ति प्रशंसां प्राप्नुवन्ति च॥”)
आत्मप्रशंसानिषेधो यथा;—
“न चात्मानं प्रशंसेद्वा परनिन्दाञ्च वर्जयेत्।
वेदनिन्दां देवनिन्दां प्रयत्नेन विवर्ज्जयेत्॥”
इति कौर्म्मे उपविभागे १५ अध्यायः॥

प्रशमः, पुं, (प्रशमनमिति। प्र+शम्+भावे घञ्।) शमता। उपशमः यथा,—
“एतानि दशपापानि प्रशमं यान्तु जाह्नवि!”
इति तिथ्यादितत्त्वम्॥
(यथा च हरिवंशे। ९८। ८१।
“स तेन वारिणा वह्निस्तत्क्षणात्प्रशमं ययौ॥”

प्रशमनं, क्ली, (प्र+शम्+णिच्+ल्युट्।) मारणम्। वधः इति हेमचन्द्रः॥ (प्र+शम्+ल्युट्।) शमता। प्रशान्तिः। यथा,—
“सर्व्वावाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि!।
एवमेव त्वया कार्य्यमस्मद्वैरिविनाशनम्॥”
इति मार्कण्डेयपुराणम्। ९१। ३५।
(प्रतिपादनम्। दानम्। इति कुल्लूकभट्टः॥ यथा, मनुः। ७। ५६।
“तैः सार्द्धं चिन्तयेन्नित्यं सामान्यं सन्धिविग्रहम्
स्थानं समुदयं गुप्तिं लब्धप्रशमनानि च॥”
स्थिरीकरणम्। प्रशमनेन स्थिरीकरणेन। यथा रघुः। ४। १४।
“लब्धप्रशमनस्वस्थमथैनं समुपस्थिता।
पार्थिवश्रीर्द्वितीयेव शरत्पङ्कजलक्षणा॥”)
इति मल्लिनाथः॥

प्रशस्तं, त्रि, (प्रशस्यते स्मेति। प्र+शन्स+क्तः।) क्षेमम्। इति शब्दरत्नावली॥ प्रशंसनीयम्। अतिश्रेष्ठम्। इति मतल्लिकादिशब्दटीकायां भरतः॥ (यथा, रघुः। ५। २५।
“स त्वं प्रशस्ते महिते मदीये
वसंश्चतुर्थोऽग्निरिवाग्न्यगारे॥”)

प्रशस्यः, त्रि, प्रशंसनीयः। प्रपूर्व्वशन्सधातोः कर्म्मणि क्यप्प्रत्ययेन निष्पन्नः॥ (यथा, कामन्दकीयनीतिसारे। ११। ५५।
अपश्चात् तापकृत्सम्यगनुरक्तिफलप्रदः।
अदीर्घकालोऽभीष्टस्य प्रशस्यो मन्त्र इष्यते॥”)

प्रशान्, [म्] त्रि, प्रकर्षेण शाम्यति यः। (प्र+शम्+क्विप्। “अनुनासिकस्य क्विझलोः क्ङिति।” ६। ४। १५। इति दीर्घः।) शान्तः। इति मुग्धबोधव्याकरणम्॥ (सामर्थ्ये नान्तोऽव्ययोऽयम्॥)

प्रशान्तः, त्रि, (प्रकर्षेण शान्तः।) प्रकृष्टशमताविशिष्टः। यथा,—
“प्रशान्तश्वापदाकीर्णं मुनिशिष्योपशोभितम्॥”
इति मार्कण्डेयपुराणे। ८१। ९।

प्रशास्ता, [ऋ] त्रि, (प्रशास्तीति। प्र+शास्+तृच्। “प्रसितस्कभितेति।” ७। २। ३४। इति निपातनादिड़भावः। यद्वा, “तृन्तृचौ शंसिक्षदादिभ्यः संज्ञायाञ्चानिटौ। उणा० २। ९४। इति तृण् इट् च न।) ऋत्विक्। मित्रम्। इति संक्षिप्तसारोणादिवृत्तिः॥ शासनकर्त्ता॥ (यथा, कामन्दकीयनीतिसारे। १३। ४५।
“प्रशास्त्रध्यक्षसेनानां मन्त्रामात्यपुरोधसाम्।
सम्यक्प्रचारविज्ञानं दुष्टानाञ्चावबोधनम्॥”

प्रश्नः, पुं, (प्रच्छनमिति। प्रच्छ+“यजयाचयतेति।” ३। ३। ९०। इति नङ्। “च्छ्वोः शूड़िति।” ६। ४। १९। इति शः। “प्रश्ने चेति” ३। २। ११७। इति ज्ञापकात् न सम्प्रसारणम्।) जिज्ञासा। तत्पर्य्यायः। अनुयोगः २ पृच्छा ३। इत्यमरः। १। ६। १०॥ (यथा, मनुः। १। ११५।
“साक्षिप्रश्नविधानञ्च धर्म्मं स्त्रीपुंसयोरपि॥”
“पृच्छा तन्त्राद्यथाम्नायं विधिना प्रश्न उच्यते॥”
इति चरके सूत्रस्थाने त्रिंशोऽध्याये॥)

प्रश्नदूती, स्त्री, प्रश्नस्य दूतीव।) प्रहेलिका। इति त्रिकाण्डशेषः॥

प्रश्नी, स्त्री, (पृश्निः पृषोदरादित्वात् रः। वा ङीप्।) कुम्भिका। इति त्रिकाण्डशेषः॥

प्रश्रयः, पुं, (प्रश्रयणमिति। प्र+श्रि+भावे अच्।) प्रणयः। इत्यमरः। ३। २। २५॥ (यथा कामन्दकीयनीतिसारे। ८। ८।
‘अदीर्घसूत्रताक्षौद्रं प्रश्रयः स्वप्रधानता।
प्रकृतिस्फीतता चेति विजिगीषुगुणाः स्मृताः॥’)

प्रश्रितः, त्रि, (प्र+श्रि+क्तः।) विनीतः। इत्यमरः। ३। १। २५॥ (यथा, रामायणे। १। १३। २।
“अब्रवीत् प्रश्रितं वाक्यं प्रसवार्थं द्विजोत्तमम्॥)

प्रश्लथः, त्रि, (प्रकृष्टः श्लथः।) शिथिलः। इति त्रिकाण्डशेषः॥

प्रष्टा, [ऋ] त्रि, (पृच्छतीति। प्रच्छ+तृच्। “व्रश्चेति।” ८। २। ३६। इति षः।) प्रश्नकर्त्ता। तत्पर्य्यायः। कथंकथिकः २। इति